CC-0. In Public Domain. Digitization by eGangotri

तत्वज्ञानसंसिद्धिः महासुख प्रकाशिका

(टीकासहित)

प्रकाशक
धर्मोदय सभा
(चतुर्थ विश्व बौद्ध सम्मेलन)

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

धर्मोदय ग्रन्थमाला– ३७

" नम तस्स भगवतो अरहतो सम्मा सम्बुद्धस्स "

तत्वज्ञानसंसिद्धिः महासुख प्रकाशिका

(टीकासहिता)

प्रकाशक

धर्मोदय सभा

(चतुर्थ विश्व बौद्ध सम्मेलन)

(प्रथमावृत्ति १०००)

२५०० बु. सं.

२०१३ वि. सं.

हिमालय प्रेस

ॐबहालटोल नःवहील,

काठमाडौं, नेपाल ।

मू–। ५०

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशकया छत्वाचा खँ

नेपाले अलौकिक चमत्कार विशेषयाना मन्त्रया अलौकिक प्रभाव दु धका खँ ह्लाय्गु थौंयागु शिशवीं शताब्दीया जमानाय् छगू कौतुहलया विषय खः। तर थ्व कौतुहलपूर्ण क्षेत्रे नं अनुसन्धान यात धासा मानव मनोविज्ञानया दुने लाना च्वंगु, ज्ञान व अन्तर्दृष्टि यात विस्तृत याइगु छगू स्त्रोत ल्वीके फई।

भगवान बुद्ध प्रतिवादन याना विज्यागु बौद्ध दर्शनया सिद्धान्त नाप आधारभूत समानता दःसां नेपालया बौद्ध धर्म छगू थःहे तालगु 'वाद' खः। किन्तु विभिन्न समयसं जनतां आवश्यकतानुसार दुचाय्कुगु भीत समयं कं। उकींहे नेपाले बौद्ध दर्शनया व्यवपक्ष छुं भन्ना पाना वोंगु खः।

सटिप्पण "तत्वज्ञानसंसिद्धिः महासुख प्रकाशिका" नामक थ्व सफूचा द्यछाय् खंगुलिं धर्मोदय सभा थःत सौभाग्यशाली भापिई। टिप्पणी सहित थ्व सफू महायानी बौद्ध दर्शन पाखे न्ह्यज्यागु छपला खः। थ्व संस्कृत सफुलीं आतक्क रहस्य पूर्ण जुया च्वंगु थ्व क्षेत्रे अनुसन्धान याय्गु विद्वान पिनिगु इच्छायात उद्वोधन याई धका जिमिसं आशायाना। पाठक वर्ग थुकी छुं न्हूगु खं ल्वीकिइ हानं वयकःपिसं थुकीं फक लाभ नं प्राप्तयानादी धैगु जिमिसं आशायाना।

आशाराम शाक्य
मंत्री, धर्मोदय सभा

२४ कार्तिक
२०१३

CC-0. In Public Domain. Digitization by eGangotri

PUBLISHER'S NOTE.

It is rather a curiosity in this 20th century to speak of supernatural feats and specially of mantric influences in Nepal. But researches into those fields of mystery are still a source of knowledge and insight into the depths of human psychology.

Buddhism in Nepal is indeed, a peculiar 'Ism' of its own though there is, of course fundamental agreement with the principles propounded by Lord Buddha. But the passage of time into different periods speak of the changes required by people. Hence a little deviation of treatment in Buddhist philosophy in Nepal.

CC-0. In Public Domain. Digitization by eGangotri

The Dharmodaya Sabha feels it an honour to present this booklet 'Tattwo Gyana Sansiddhi Maha Sukha Prakashika" with notes also is a step towards, Mahayana conception of Buddhism. This Sanskrit Text, we hope, will create a desire in Scholars to do research into fields still presenting a baffling problem. We, however, hope that the readers will get in it something that is really new and they too will make the best out of it.

24 Kartik. *Asha Ram Sakya*
2013 *General Secretary*
2500 *The Dharmodaya Sabha.*

CC-0. In Public Domain. Digitization by eGangotri

ॐनमः श्रीभगवत्यै वज्रवाराह्यै ॥

आनन्दाम्बुधिमण्ड१नादुपगता सम्बुद्धलक्ष्मीरसौ ।
सर्वाकारगुणान्विता जगदघध्वा न्तौघविध्वंसिनी ॥
ज्योतिर्ज्ञाननिधेर्धृतिः स्मृतिनिधेः शान्तिर्मनीषानिधेः ।
पायाद्वज्रविरासिनी भगवती लोकत्रयं दुर्गतेः ॥१॥

श्रीवज्रदेवीपदपद्मरेणु,राजिं नमस्कृत्य गुरोः पदं च ॥
श्रीसम्वरं संवृतबोधिचित्तं, प्रज्ञाकृपाद्वैतपदं प्रशस्तम् ॥२॥

वज्रदेवीपदद्वंद्ववन्दनानन्दवर्त्तिना ॥
भिक्षुणा ज्ञानेन्द्रेण चन्द्रेवसुवशर्मणा ॥ ३ ॥

साधनं वज्रवाराह्याः स्वार्थं किञ्चिद्विभज्यते ॥
सुभाषितप्रदे नित्यं मतिः कल्पनसोत्सुका ॥ ४ ॥

ततःश्रद्धापरेणेदं मन्दस्वल्पधिया मया ॥
कर्त्तव्य३ न मम दोषो वीक्षणीयो महाजनैः ॥५॥

आचार्य्यश्रीशून्यतासमाधिवज्रपादः श्रीवज्रदेव्याः साधनं कर्त्तुकामः प्रथमतो भगवतीस्वरूपगुणोद्भावेन द्वारेणाशीर्वादपरं श्लोकद्वयं करोतिस्म ॥

---

१ मज्जनाद्, इति उपयुक्तः पाठः प्रतिभाति । २ शान्ते इति वा, व्यो३ नमम इति साधु ।

CC-0. In Public Domain. Digitization by eGangotri

ॐ नमः श्री वज्रवाराह्यै

उद्याता तलचक्रतोऽनिलधुता विद्युच्छटाभास्वरा,
दग्धालित्रितया त्रिलोकमहिता पीयूषधाराप्लुता ॥
बुद्धज्ञानरसाविला विकलुषा स्वानन्दसन्दोहदा
भावाभावविचारणाविरहिता वाराहिका पातु वः ॥१॥

उद्यातेत्यादि ॥ वो युष्मान्वाराहिका पातु इति सम्बन्धः ॥ वरं बोधिचित्तं आहिनोतीति वाराही, हि गतौ । आङ्पूर्वात्, संज्ञायां अण् । पृषोदरादित्वादात्वं । महासुखचक्रस्थितं भगवन्तमन्वेतीत्यर्थः । बोधिचित्तभगवतोर भेदात् कीदृशी भगवती । उद्याता ऊर्द्धं गता, कस्मात्तलचक्रतो निर्माणचक्रतः ॥ अनिलधुता अनिलेन वातेनापानसंज्ञातेन कम्पिता । विद्युच्छटाभास्वरा विद्युदिव सरागा निर्मला च। दग्धालित्रितया. दग्धं आलित्रितयं यया. आलिशब्देन चक्रमभिधीयते. सधर्मसंभोगमहासुखाख्यं दग्धं तद्विकल्पापगमात् । त्रिलोकमहिता. त्रिभिर्लोकैः कामरूपावचरै र्महिता पूजिता. या सा तथोक्ता ॥ अथवा चक्रत्रयस्थितैस्तथागतै र्लोकैः पूजिता अत एव पीयूषधाराप्लुता. पीयूषं बोधिचित्तं, तस्य धाराप्लुता स्नापिता, वाह्येपि पूजाजलादिभिःक्रियते । अत्र च बोधिचित्तं धारेव जलस्नानं । बुद्धज्ञानरसाविला. बुद्धज्ञानं सदसदादिविकल्परहितं तदेव रस स्तेन आविला व्याप्ता, सहजसुखमयित्वाद भगवत्याः । अत एव विकलुषा. कलुषं बोधिचित्तं च्युतिरभिधीयते । अत एव-

CC-0. In Public Domain. Digitization by eGangotri

विरागोत्पत्तिः । " च्युतेर्विरागसंभूतिर्विरागाद् दुःखसंभव " इतिप्रवचनात् तदेवदुःखं यत्संसारावाहकं कर्मतः । च्युतेरेव संभवति ॥ तथाच । " नविरागात्परं पापं न पुण्यं सुखतः परमिति ॥ स्वानन्दसन्दोहदा. सुष्ठु आनन्दसन्दोहः स्वानन्दसन्दोहस्तं ददातीति । सर्वजनायेतिशेषः ॥ भावाभावविचारणाविरहिता । भावः शाश्वतग्रहः, अभाव उच्छेदग्रहस्तयोर्विचारणा, तया विचार रहिता अत्यन्तआनन्दनिर्भरत्वात् ॥ १ ॥

निर्माणालिदिनेशमण्डलगता काद्यादिवर्णावृता,
प्रज्ञालज्वलनोज्वलामृतसवा सूक्ष्माब्जसूत्रोपमा
विद्यावुद्बुकदम्बकं दहति या चक्रत्रयोर्भेदिनी
सानन्दा ललितोर्द्धगा स्फुरतु वो वाराहिका चेतसि ॥२॥

निर्माणालीत्यादि । वो युष्माकं चेतसि वाराहिका स्फुरत्विति संबन्धः ॥ निर्माणालिदिनेशमण्डलगता निर्माणचक्रसूर्यमण्डलगतेत्यर्थः । काद्यादिवर्णावृता, प्रज्ञास्वभावेयं वज्रवाराही प्रज्ञाच संकरं वाह्य य व्याप्ता भगवती ॥ प्रज्वालज्वलनोज्वला. अत्यन्तभास्वराकारत्वात् । समस्तपापान्धदहनाच्च । अमृतसवा. अमृतं वोधिचित्तं तेन सवःस्नानं यस्याः सूक्ष्माब्जसूत्रोपमा. सूक्ष्मं अब्जसूत्रं मृणालसूत्रं तदेवोपमा यस्याः । अवधूतीस्वरूपत्वात् अनुलम्भज्ञानसूचनाच्च । विद्यावुद्बुकदम्बकं दहति या विद्यालोचनादयः पृथिव्यादिस्वभावाः बुद्धा वैरोचनादयो तयोर्मेलकं दहति । अनुलम्भप्रवेशयति ।

CC-0. In Public Domain. Digitization by eGangotri

तथाच हेवज्रे ॥ " चण्डाली ज्वलिता नाभौ दहति पञ्च तथागतान् । दहति लोचनादीश्च दग्धोहं स्रवते शशी " । ततश्चण्डाली स्वरूपेयं भगवती । चक्रत्रयोर्भेदिनी धर्मसंभोगमहासुखचक्रोर्ध्वगमनात् ॥ अत एव सानन्दा ललिता सर्वाकारवरोदयात् ऊर्ध्वगा ऊर्ध्वतो सततं महासुखचक्रगमनादिति ॥ २ ॥

प्रणिपत्य वज्रपूर्वां वाराहीं वज्रयोगिनीम् ।
शिरसा स्वस्मृतये वक्ष्येऽहं तत्त्वज्ञानस्य संसिद्धिम् ॥ ३ ॥

प्रणिपत्येत्यादि । तत्त्वज्ञानस्य संसिद्धिं वक्ष्ये इति सम्बन्धः । तस्य स्वभावस्तत्वं । अनुत्पादलक्षणं अनुत्पाद तत्व इति वचनात् । तस्य ज्ञानं सम्यगवबोधं तस्य सम्यक्सिद्धिमभिधास्ये वाराहीं प्रणिपत्य वज्रपूर्वां वज्रवाराहीमित्यर्थः ॥ वज्रयोगिनीं वज्रमनुपलम्भज्ञानं. तेन सह योगो अस्यास्तीति । शिरसा उत्तमांगेन । किमर्थं वक्ष्ये स्वस्मृतये. आत्मस्मरणायेत्यर्थः । औद्धत्य परिहार एव आचार्य्यवरस्य ॥ ३ ॥

विजनमनोऽनुकूलस्थानं नाथांकक्रः प्रविशेत्सुधीः ॥
तत्र सुकुमारमासनमुपविश्य विभावयेच्छुद्धिं ॥ ४ ॥

प्रथमतः स्थानसंपत्तिमाह ॥ विजनमित्यादि शुद्धिं भावयेदिति सम्बन्धः ॥ शून्यतां भावयेदित्यर्थः । सर्वेषामेव वस्तूनां विशुद्धिस्तथता मतेति न्यायात्-अनादिकालसंचितविकल्पसमूह परित्याग एव प्रयोजनं । शून्यताभावनायाः विजनं स्थानं प्रविश्य

CC-0. In Public Domain. Digitization by eGangotri

जनरहितं, एकाकिनैव चित्तसमाधानकारणं विजनमपि स्थानं यथा कथंचिद्भवति। न चित्तसमाधानाय। अत आह मनोऽनुकूल यत्र चित्तस्थिरता भवति, तत्रकृत्वा। आसनमुपविश्य आसनमपि सामान्यं नसुखकारि अतो विशिष्यते सुकुमारं कोमलं किंविशिष्टं सन्नाथाङ्कः नाथः स्वकीयो गुरुः तेनाङ्कितं लक्षितं शिरो यस्य स नाथाङ्कः। अथवा वैरोचनाङ्कितमस्तकं। सुधी पण्डितः। एवं विधेऽर्थे प्राज्ञस्यैवाधिकारात्. अथ विशेषस्तु कथ्यते। विजनं विगतो जनोपलम्भो यत्र विजनं महासुखं लक्षणमित्यर्थः। अत एव मनोऽनुकूलं महासुख एव चित्तस्यैकाग्रतासंभवात्। स्थानं स्थीयते तत्रेति स्थानं महासुख एव जगतोऽवस्थानात्। सर्वसुखमयं जगदिति वचनात्। नाथाङ्कः नाथो वज्रगुरुस्तस्याङ्कश्चिह्नं चतुर्थक्षणस्तत्र कं सुखं यस्यस नाथाङ्कः अतएव सुधीः तदपि कारणसव्यपेक्षं। तत्र कारणमाह। सुकुमारमासनमुपविश्य आसनं धर्मोदया। सुकुमारमित्यनेन प्रथमयौवनोपेतं दर्शयति तत्रैव महासुखोदयसम्भवात्। उपविश्य द्वंद्वमापद्य। अत्रोच्यते यदि तदपि सुखं कारणसव्यपेक्षं, तत्कथं महासुखमित्युच्यते, यत्कारणाधीनं तदनित्यं, तत्कथं सुखम्। तथाचाऽनित्यस्य ध्रुवा पीडा पीडा यस्य न तत्सुखमिति। अत्रोच्यते। सत्यमेतत्किंतु सकारणमिति। यदुक्तं तत्संवृत्त्याकार्यकारणभावमुदिश्य लोको बुध्यते। तथाचार्य-देवपादाः॥ "नान्यया भाषया म्लेच्छः शक्यो ग्राहयितुं यथा॥ न लौकिकमृते लोकः शक्यो ग्राहयितुं तथेति"॥ यच्च सुखमनुत्पाद् लक्षणं तत्कालसहितं वा कालहितं वेति रूप्यते। तस्य बुद्धे रगोचरत्वात्। "बुद्धेरगोचरं तत्वं इति न्यायात् ततश्च स्थित मेतत् यद्वत्संवृतौ कार्य कारणभावव्यपदेश इति॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

तदनु च षष्ठजिनेन त्र्यक्षरजप्तेन वज्रधरहृदयं ॥ संलिख्यानामिकया, लोहितकुसुमार्चितं कुर्यात् ॥ ५ ॥

तदनु चेत्यादि। वज्रधरहृदयं लोहितकुसुमार्चितं कुर्यात ॥ वज्रं अभेद्यज्ञानं तद्धारयतीति वज्रधरः । सम्यक्सम्बुद्धः । तस्य हृदयमप्रकाश्यत्वात धर्मोदयाभिधीयते । करवीरादि-लोहितपुष्पैरर्चितं करणीयं । संलिख्यानामिकया वामहस्ताऽनामिकांगुल्येत्यर्थः । षष्ठ जिनेन षष्ठोजिनो वज्रसत्वो द्रव्यमभिधीयते । ततस्तदुत्पत्तेः कारणे कार्योपचारात । त्र्यक्षर जप्तेन । ॐ आःहुँ इत्यनेन जप्तेन। द्वितीयेऽर्थे । वज्रधरस्य सम्बुद्धस्य हृदयं पङ्कजं अनामिकया संलिख्य वज्रेण संचाल्य तथाच श्री सम्वरनाथः । " अनामाङ्गुष्ठवज्राभ्यां लेहयेद्योगवित्सदा " । षष्ठजिनेन षष्ठो वज्रसत्वस्तदुत्पत्तिहेतुत्वात् । बोधिचित्तमेव वज्रसत्वोऽभिधीयते कारणे कार्योपचारात्। तेनोपलक्षणभूतेन। न तु प्रज्ञाकमलोदयगतं बोधिचित्तं विधेयं। तदा महासुखासंभवात् तथाचादिबुद्धे। " पतिते बोधिचित्ते तु सर्वसिद्धिनिधानके । मूर्च्छिते स्कन्धविज्ञाने कुतःसिद्धिरनिदितेति " त्र्यक्षरजप्तेन काय-वाक्चित्ताभेदैकरूपेण महासुखावस्थागतेनेत्यर्थः ॥ लोहित कुसुमार्चितं कुर्यात् तदीयरजसा पूजितं विदध्यात् ॥ ५ ॥

तदनु परमाद्यपात्रे करकमलं दक्षिणेतरं क्षिप्त्वा विदधीत सवनं यथोपदेशं शयस्पर्शात् ॥ ६ ॥

तदनु विदधीत इति संबन्धः ॥ वज्रमुपलम्भज्ञानं तदुत्पत्ति हेतुत्वात् द्रव्यमेवाभिधीयते । तेन सवनं स्नानं करणीयं ॥

CC-0. In Public Domain. Digitization by eGangotri

परमाद्यपात्र इत्यादि. वज्रसवनं करकमलक्षिप्तो हस्तपद्म प्रक्षिप्य दक्षिणेतरं दक्षिणहस्तादन्यं वामहस्तमित्यर्थः। परमाद्य पात्रे परमाद्यं वज्रं तस्य पात्रं तत्र यथोपदेशं उपदेशानतिक्रमेण। त्र्यक्षरेण द्रव्यं परिशोध्य शयस्पर्शात् अस्यायमभिप्रायः। करगतदेवतागणसंतर्पणात्। तत्रवृद्धायां ह्रांयौं। तर्जन्यां ह्री मौं। मध्यमायां ह्रें ह्रीं। अनामिकायां हुँ हुं। कनिष्ठिकायां. फट् २॥ हस्तमध्ये ॐ वँ। विन्यस्य तर्प्य च वामहस्तेन भगवनो मंत्रेण द्रव्यमात्मनोऽङ्गप्रत्यङ्गं भावयेत्॥ द्वितीयार्थे। परमाद्य पात्रे परममुत्कृष्टत्वात् आद्यं सुखस्यादिकारणभूतत्वात् तदेव पात्रं सुखस्याधारभूतत्वात्। विद्यापंकजमेत्राभिधीयते। तत्र पात्रे निमित्तीभूते करकमलकं. सुखं रात्रीतिलकं बोधिचित्तमुपद्यते तदेव कमलं विबुद्धत्वात् स्पृहणीयत्वाच्च श्रेष्ठगुणयुक्तत्वाच्च। अत एव दक्षिणेतरं दक्षिणेपि रजोधातुरस्ति। ततोऽन्ये चन्द्रधातु हं क्षिप्त्वाऽवधूतिवन्मनः उर्द्ध्वमुत्क्षिप्य विदधीत वज्रसवनं अव धूतिगतं यदा बोधिचित्तं भवेत्तदा वज्रमभिधीयते। तेन सवनं स्नानं कुर्यात। महासुखचक्रं बोधिचित्तं नयेदिति। यथोपदेशं गुरुपदेशत इति अत्र गुरुचरणः शरणीकरणीयः शयस्पर्शात् हस्तेन गुरूविद्यास्तेन स्पृशति तदेव सरागं चित्तं भवति यदा च सरागं चित्तं भवेत् तदानीमवधूतिविकाशो भवति। यदाऽ-वधूतिविकाशःस्यात्तदैव महासुखचक्रमभिव्याप्नोभिबोधिचित्त मिति॥ ६ ॥

प्रविधाय करन्यासं वृद्धाङ्गुष्ठाङ्गुलिसमायोगात्
कुर्वीताङ्गन्यासं षड्भिर्वीरेश्वरीमन्त्रैः ॥ ७ ॥

प्रविधायेत्यादि। अङ्गन्यासं कुर्वीतेति सम्बन्धः॥ प्रविधाय

CC-0. In Public Domain. Digitization by eGangotri

करन्यासं । उक्तक्रमेणैव षड्देवतामन्त्रेण करन्यासं कृत्वा वृद्धाङ्गुलिसमायोगात् वामहस्तेन वृद्धानासिकाभ्यां द्रव्यं गृहीत्वा हस्तमभिप्रेक्ष्य ततोऽङ्गन्यासं कुर्वीत ॥ षड्भिर्वीरेश्वरीमन्त्रैः ॥ तत्र ॐ वँ नाभौ रक्तवर्णवाराहीदेव्युपलक्षकं हांयौँ हृदि नीलवर्णं यामिनीदेव्युपलक्षणं । ह्रीँमौँ वक्त्रे सितवर्णमोहिनीसमुपलक्षकं । ह्रेँह्रीँ शिरसि पीतं संचारिणीसमुपलक्षकं । हुँहूँ शिखायां हरितवर्णसंत्रासिनीदेव्युपलक्षकं । फट्फट् ललाटे धूम्रवर्णचण्डिकादेव्युपलक्षकं ॥ मंन्त्राक्षरं विन्यसेत् । मन्त्रदेवतयोरभेदात् । अथवा तदक्षरं तत्तदक्षरपरिणामेन देवता एव भावनीयाः ॥ ततो वज्रवाराही रक्तवर्णा त्रिमुखा षड्जा मूलमुखं रक्तं वामे नीलं दक्षिणे हरितं वामे कपाल खट्वाङ्गधरं पाशधारिणी दक्षिणेऽङ्कु शत्रह्ममुण्डकर्त्तिधारिणी आलीढपदा यामिनी नीलवर्णा एकमुखा चतुर्भुजा वामे कपाल खट्वाङ्गघण्टा दक्षिणे कर्त्तिधारिणी । मोहिनी संचारिणी संत्रासिनी चण्डिका सितपीतहरितधूम्रवर्णा एकवक्त्रा चतुर्भुजा सर्वासामेव वामे कपालखट्वाङ्गघण्टाः दक्षिणे डमरूकर्त्तिकाः सर्वा एवालीढपदा मुक्तकेशिन्यः त्रिनेत्रा या शुक्ला साचन्द्रप्रभा चन्द्रमण्डलिनी अन्या सूर्यप्रभा सूर्य्यमण्डलिन्यः ॥ द्वितीयोऽर्थः ॥ कं सुखं करोतीति करो बोधिचित्तं तस्य न्यासं सर्वाङ्गव्यापनं वृद्धाङ्गुलीसमायोगात् ॥ प्रज्ञापंकज सुवज्रयोगात् " अनामोङ्गुष्ठवक्त्राभ्यां लेहयेद्योगवित्सदेवेति वचनात् " ॥ " भगे लिङ्गं प्रतिष्ठाप्य बोधिचित्तं न चोत्सृजेत् । भावयेद्बुद्धबिम्बम्वै त्रैधातुकमशेषतः " इति न्यायात् । कुर्वीताङ्गन्यासं षड्भिर्वीरेश्वरीमन्त्रैः ॥ विशुद्धभगवतीरूपं वक्ष्यमाणं षड्देवता

CC-0. In Public Domain. Digitization by eGangotri

परमोनुघटितं । झटिति शून्यतानन्तरं समालक्षणीयं शून्यता-भावनानन्तरं श्रीवज्रदेवीरूपमारक्षांगन्यासादिकं विधाय वज्रधरहृदयं लिखित्वा लोहितकुसुमार्चितं करणीयमिति बोधव्यं ॥ ७ ॥

तदनु चक्रवज्रधरोपरि रङ्गारुणयोगजसममन्त्रं ।
भुजगभवैः सुविशिष्टैः सिचयगतैरवकिरेच्छनकैः ॥ ८ ॥

तदनु वज्रधरोपरीत्यादि अमन्त्रमवकिरेदिति सम्बन्धः । अमन्त्रं पात्रमुच्यते रंगारुणयोगजं. रंगो वङ्गोऽरुणं ताम्रं तयोर्योगो मेलकस्तत्र जातं रङ्गारुणयोगजं कान्स्यमित्यर्थः । समं वैषम्यादिदोषरहितत्वात् कुत्रावकिरेद वज्रधरोपरि वज्रं द्रव्यं. धारयतीति वज्रधरः तस्योपरि मदनसहितनृकपालोपरीत्यर्थः ॥ भुजगभवैः भुजगो नागः शीशकमित्यर्थः । तत्रभवैः सिन्दूरैः सुविशिष्टैरुत्कृष्टैः सिचयगतैः सिचयो वस्त्रान्तर्गतैः । अत्रोपदेशः रजस्वलावस्त्र उत्कृष्टसिंदूरेण दोलापट्यन्त्रेण तर्जन्यांगुल्या काम्स्यपात्रमवकिरेत् । शनकैरिति । द्वितीयोऽर्थः । वज्रमद्वयज्ञानं धारयतीति वज्रधरः प्रज्ञापंकजं तस्योपरि रंगारुणयोगजं समं मन्त्रं रंगो रागयुक्तन्मन्यग्रमेव अरुणमिवारुणं विद्यापद्मकिंजल्कं तयोर्योगो मेलकः । तत्रजातरंगारुणयोगजं महारुणसहितं बोधिचित्तमित्यर्थः । अत एव समन्त्रं सकलविकल्पापगमादमन्त्र सर्वज्ञज्ञानस्य प्रतिष्ठाभूत्वात्तदवकिरेद्भुजगभवैः सिन्दूररागैरित्यर्थः । सुविशिष्टैर्महारागैः सिचयगतैरिव सुप्रतिबद्धैरित्यर्थः शनकैः क्रमेण ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्र जिनहृदयचक्रं शिखिकोटिकं समभिलिख्य तद्गर्भे मन्त्रालीं गाङ्गेयशलाकया विलिखेत् ॥ ९ ॥

तत्रेत्यादि । मंत्रालीं विलिखेदिति सम्बन्धः । चक्रं समभिलिख्य शिखिकोटिकं शिखिनो वन्हेरिव कोटिरग्रं यस्य तच्छिखिकोटिकं त्रिकोणमित्यर्थः । अत्रोपदेशः षडारमेव चक्रं लेखनीयं जिनहृदयं हृदयं तस्यापि हृदयं गुह्यज्ञानोत्पत्तिहेतुत्वात् । तद्गर्भे तच्चक्रमध्ये गाङ्गेयशलाकया सुवर्णशलाकया वामहस्तेनैव लिखितव्योऽयं मन्त्रः । द्वितीयोऽर्थः । जिनहृदयाहृदय विद्या कमलं तदेव चक्रं अशेषजिनज्ञानालयत्वात् । शिखिकोटिकं शिखिनः कोटियंत्रज्ञानाग्नितेजभूतत्वात । समभिलिख्य सुयत्नेन सह संयोगमापद्य तद्गतस्यच गर्भो यस्योद्गर्भः सुनिर्माणचक्रं तलइत्यर्थः ॥ मंत्रालीं विलिखेत् मनः संत्राणनान्मंत्रः बोधिचित्तं तस्यालिः पंक्तिः तां बोधिचित्ताधारां अर्पयेत् गांगेयशलाकयेति । अवधूत्यास्तु सुवर्णलोहितत्वात् अवधूत्यामपि सरागत्वात् अतः सुवर्णस्य शलाकया समानता ॥ ९ ॥

चक्रस्य वाह्यभागे पूर्वोत्तरपश्चिमार्किदिग्देशे । सत्स्वस्तिकानभिलिखेत्क्रमेण वामहस्तेन ॥ १० ॥

चक्रस्येत्यादि । सत्स्वस्तिकानभिलिखेदिति सम्बन्धः । नन्द्या वर्त्तानिति चक्रस्य वाह्यभागे । पूर्वोत्तरपश्चिमार्किदिग्देशे पूर्वउत्तरपश्चिम दक्षिणक्रमेण वामावर्त्तेनापि वामेनापि हस्तेन । द्वितीयोऽर्थः । चक्रस्य वाह्यभागे निर्माणचक्रस्य वाह्ये पूर्वो-

CC-0. In Public Domain. Digitization by eGangotri

त्तरपश्चिमार्किदिग्देशे सर्वत्रैवेत्यर्थः । स्वस्तिकानभिलिखेत् । शोभनस्वस्तिकं स्थितिर्यत्र सर्वत्रैवावधारणां कुर्यात् । क्रमेण शनैः शनैर्वामेन हस्तेन हस्तोधारणा कर्माः तत्साधर्म्यात् हस्तो वातस्तेन वामनासिकापुटस्थितेनेति ॥ १० ॥

आकृष्य वज्रदेवीम्प्रविश्य मन्त्राक्षरेषु वद्ध्वा परितोपयेत् सुविधानात् जः हुँ वँ होरिति पठित्वा ॥ ११ ॥

आकृष्येत्यादि । वज्रदेवीं परितोपयेदिति सम्बन्धः । आकृष्य कनिष्ठभुवनवासिनीं भगवतीमाहृदयं प्रवेश्य मंत्राक्षरेषु वद्ध्वा विधानात् ॥ तत्रायं विधिः । ज्वालामुद्रां वद्ध्वा वामावर्त्तेन ललाटे भ्रामयेत् उर्द्धं निरीक्षमाणः फेँकारपाठपूर्वकं जःहुँ वँ होरिति पठित्वा तत्र जःकारेणाकर्षणः हुँकारेण प्रवेशनं वकारेण बंधनम् होकारेण तोषणम् । द्वितीयोऽर्थः आकृष्य वज्रदेवीं वज्रवाराही चण्डालीस्वरूपामाकृष्याऽवधूत्यां प्रवेश्य मंत्राक्षरेषु-वद्ध्वा च मंत्रो वोधिचित्तं तस्याक्षराणि शून्यता तन्मयिकृत्य परितोपयेद्विधानात् पुनः पुनरेवं कुर्यात् यथाविशेषं सुगमं ॥ ११ ॥

तदनु सपर्या विविधास्तस्या विदधीत मंत्ररूपायाः भक्ष्यैर्भोज्यैर्लेह्यैः पेयैश्चोष्यैः सकामगुणैः ॥ १२ ॥

तदन्वित्यादि । सपर्यांस्विदधीतेति सम्बन्धः पूजां विदध्यादिति सम्बन्धः । अर्थः । विविधां महतीं तस्या वज्रदेव्या मंत्ररूपाया दर्पणतले सिन्दूरघातपुरःसरं विलिखितायाः शेषं सुगमं ॥

CC-0. In Public Domain. Digitization by eGangotri

सकामगुणैरित्यादि विशिष्टतरैरित्यर्थः । द्वितीयोऽर्थः । सपर्यां पूजां विदधीत वोधिते वोधिचित्तेति वोधव्यं विविधां अविछिन्नवोधिचित्तधाराविनिर्मितां मंत्ररूपायाः शून्यतास्व भावायाः भक्ष्यैरित्यादि रूपादिभिरित्यर्थः । सकामगुणै र्महासुखसहितैरियमेव पूजा सर्वविकल्पशान्तये ॥ १२ ॥

विविधैर्वलैः समदनैरुपहारैः पञ्चभिरतिपरार्घ्यैः ॥
गीतैर्वाद्यैर्नृत्यैः प्रदक्षिणाप्रणतिनुतिभिश्च ॥ १३ ॥

विविधैरित्यादि । त्रिविधैर्वलैर्वहुभिर्वलैर्मांसैः समदनैर्द्रव्यसहितैरुपहारैः पञ्चभिः मुद्गमाषामसुरकलाययवगोधूमैः अथ रूपशब्दगन्धरसस्पर्शैरिति परार्घ्यैरुत्कृष्टैः । गीतैर्वज्रगीतैः वाद्यैर्वीणादिभिर्नृत्यैर्वज्रपदनृत्यैः प्रदक्षिणाप्रणतिनुतिभिश्चेति सुवोधं ॥ द्वितीयोऽर्थः । वलैर्मांसैरुच्छ्रयपञ्चस्कन्धैः सहानुपलम्भप्रवेशःकर्त्तव्यः अत एव समदनैर्महासुखोपस्थापितवोधिचित्तैः शेषं यथारूपम् ॥ १३ ॥

प्रतिदिवसं प्रतिपक्षं प्रतिमासं वा तिथौ दशम्यां ॥
कुर्याद्यथोक्तपूजाविधिमस्याः सिद्धिमाकांक्षणः ॥ १४ ॥

प्रतिदिवसमित्यादि यथोक्तपूजाविधिं कुर्यादिति सम्बन्धः । प्रत्यहम्वा प्रतिपक्षम्वा प्रतिमासम्वा दशम्यां तिथौ वा समसुधीः अस्या वज्रयोगिन्याः सिद्धिमाकांक्षणः । लौकिकलोकोत्तरां सिद्धिं मनसि कुर्वाणः इयमेव भगवती सर्वसुखसन्दोहं ददातीं-

CC-0. In Public Domain. Digitization by eGangotri

त्यभिप्रायः ॥ १४ ॥

इति श्रीतत्वज्ञानसंसिद्धौ मध्यमकरुचिभिक्षुश्रीध्यानचन्द्रविरचितायां महामुखप्रकाशिकायां टीकायां वाह्यपूजाविधिः प्रथमः ॥ १ ॥

अथ कृतवाह्यार्चनविधिरुरुकरुणो निर्मितारिमध्याब्जे ॥
व्यसुहृदयोष्णगुविम्वां ध्यायात्पूर्वोदितां देवीम् ॥ १ ॥

इदानीं वज्रवाराह्या भावनाविधिरुच्यते ॥ अथेत्यादि ध्यायाद्देवीमिति सम्बन्धः । पूर्वोदितां दीपङ्करशाक्यमुनिप्रभृतिभिस्तथागतैः कथितां अथवा यथापूर्वां भावनां कालकथितां तां भावयेत् । उरुकरुणो महाकरुणः वोधिचित्तं संपूर्णकायं इत्यर्थः । निर्मितारिमध्याब्जो इति निर्माणचक्रमध्ये पंकजे व्यसुहृदयोष्णगुविम्व इति विगता असवः प्राणा यस्य सः व्यसुस्तस्य हृदयं । उष्णो गौ रश्मिर्यस्य स उष्णगुस्तस्य विम्वं व्यसुहृदय उष्णगुविम्वस्वहृदयोष्णगुविम्वां अस्यायमर्थः । निर्माणचक्र पद्मोपरि मृतकहृदये सूर्यविम्वभगवतीं ध्यायात् ॥ एतदुक्तं भगवती वोधिचित्तं मन्यत्र गत्वा व्यावृत्य यदा निर्माणचक्रगत तं तदा यादृशं सुखमुपद्यते तत्सूचकः शवस्तस्य हृदयं शून्यता सूर्य्यविम्वन्तु निर्विकल्पज्ञानमार्तण्डद्योतकं सकलविकल्पान्धकारविध्वंसनात् ॥ तत्र सर्वाकारे वरोपेतां शून्यतां ध्यायादिति ॥ १ ॥ कीदृशीं ॥

संध्यासिन्दूरवर्णां खरकरनिकरायास्तसप्तार्कक्रान्तीं

CC-0. In Public Domain. Digitization by eGangotri

कर्त्रीं सर्वार्त्तिहंत्रीं स्फुरदमृतघृणीं विभ्रतीं सव्यदोष्णा ॥
विभ्राणां वामदोष्णा कमलमतिसितं रक्तपूर्णध्वजाढ्यां
काल्या दम्भोलिकाल्या परिगतशिरसं मुक्तमूर्द्धोखहस्तां ॥२॥

संध्यासिन्दूरेत्यादि। संध्यासिन्दूरयोरिव वर्णा यस्यास्तां महारागस्योदयात् खरकरनिकरायास्तसप्तार्ककान्तीं खरस्तीव्रः करो रश्मिः खरश्चासौ करश्चेति खरकरस्तस्य निकरः समूहः खरकरनिकरेणायास्ता विध्वस्ता सप्तार्ककान्तिर्यया तां कर्तिविभ्रतीमिति सम्बन्धः। सर्वार्तिहंत्रीं सर्वामर्तिं पीडां हन्त्रीं रागादिक्लेशनिर्मूलनात् प्रज्ञाकर्तिदधानां स्फुरदमृतघृणीं स्फुरदनन्तरश्मिकां केन विभ्रतीं सव्यदोष्णा दक्षिणबाहुना दक्षिणे सूर्य्यधातोरवस्थानात् प्रज्ञायास्तीक्ष्णस्वभावत्वात् दक्षिणे कर्ति धारणं युक्तं किंच प्रज्ञा प्रज्ञाप्रहर्षेण मया महासुखचक्रे श्रीबोधिचित्तं विधृतमित्यपि दर्शयति कमलं विभ्राणामिति सबन्धः। कमलं महासुखद्योतकं अतिसितं बोधिचित्तरूपत्वात् रक्तपूर्णं महाशून्यतास्वभावत्वात्। ध्वजाढ्यां ध्वजेन खट्वाङ्गेन आढ्यो महति खट्वाङ्गधारणमवधूत्यां बोधिचित्तधारणसूचनं काल्या दम्भोलिकाल्या परिगतशिरसं कस्य मस्तकस्य आलिः पङ्क्तिस्तया काल्या शून्यपञ्चकपालधारणात् अनेन बोधिचित्तधारणं महासुखचक्रे व्यक्तीकृतं दम्भोलिकाल्या दम्भोलिर्वज्रं दम्भोलिरेव दम्भोलिकः तस्यालिर्दम्भोलिकालिः तया दम्भोलिकाल्या परिगतं सर्वतोभावेन ज्ञातं शिरो यस्याः शून्यता समन्वितबोधिधारणं सूचितं ललाटे वज्रमालाधारणात् मुक्तमूर्द्धोखे हस्तां मुक्तं यथा भवति तथा उर्द्धेणोथो हस्तो यस्याः पुनः कीदृशं॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

मुण्डालीमण्डिताङ्गीं मुखगलदसृजं स्वादगुं मुक्तनादां,
सव्ये चोर्द्ध किरास्यां वरशुभगमनां क्रोधमूलाननान्तां ॥
सानन्दां सानुरागां विविधरसयुतामर्द्ध पर्य्यङ्कनृत्यां
मुद्रापण्मुद्रिताङ्गीं व्यपगतवसनां षोडशाब्दां वराङ्गीम् ॥ ३ ॥

मुण्डालीत्यादि ॥ आलिकालिधारणात् मुण्डाली मण्डिताङ्गीं मुखगलदसृजं मुखां गलदसृक. रक्तं यस्याः स्कन्धादिचतुर्मारणां शून्यतारक्तपानात् स्वादगुं स्वादाः षट्स्वादै रूपलक्षितं गौचक्षुर्यस्याः षण्णेत्रामित्यर्थः । मुखद्वयश्रीवज्रदेव्याः प्रतिमुखे नेत्रत्रयः सम्वृत्ति परमार्थ सत्यां कालत्रयस्य सर्वाकारेण दर्शनात् मुक्तनादा अत्यत्तानन्दनिर्भरत्वात् । सव्ये चोर्द्ध किरास्यां दक्षिणे उर्द्ध सूकरमुखीं सम्वृत्तिविशुद्धितः संवृतेर्मोह स्वरूपत्वात् सूकरमुख धारणं सूकरस्य मोहनिर्जातत्वात् वरशुभगमनां क्रोधमूलांननात्ता शृङ्गारललितस्वभावत्वात् प्रधानमुखत्व सानन्दां सततं बोधिचित्तधारणात् सानुरागां अविछिन्नं महारागोदयात् । विविधरसयुतां नवनाट्यरसयोगात् अर्द्ध पर्य्यङ्क नृत्या महासुखचक्रगमनात् मुद्रापण्मुद्रिताङ्गीं मुदं हर्षं रातीतिमुद्राः मुद्रावद्भि र्मुद्रितमङ्गं यस्या अक्षीकुण्डलकण्ठिक रुचक मेखला सूत्रादिभिःषड्भिः षट्पारमिताविशुद्धितः व्यपगतवसनात् क्लेशज्ञेयावरणा प्रहाणात् । षोडशाब्दां षोडशशून्यताविशुद्धितः वराङ्गीं कल्पशतसहस्रसंचितपुण्यसंभारनिर्जातत्वात् भगवत्या कलेवरस्य ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानाकर्षादिविधिः प्रागिव कृत्वा विधानविन्मंत्री ॥
स्वस्तिकमलिकाभिमुखं भ्रमन्तमेकं द्रुतं ध्यायात् ॥ ४ ॥

ज्ञानाकर्षेत्यादि ॥ स्वस्तिकं ध्यायादिति सम्बन्धः । उक्तक्रमेणाज्ञानचक्राकर्षणं विधाय मन्त्री विधानवित् यथाविधिज्ञः । अलिकाभिमुखं भ्रमरमुखसमीपभ्रमन्तं कुलालचक्रवत् एकंनद्वयं द्रुतं शीघ्रं ॥ ४ ॥

तदनु वियद्वति धातौ त्रिकूटगिरिगह्वरे भ्रमच्चक्रं
प्रागुक्तमिव ध्यायाद्रक्तं जाज्वल्यमानं सत् ॥ ५ ॥

तदन्वित्यादि ॥ चक्रं ध्यायादिति सम्बन्धः । प्रागुक्तमिव सिंदूरपूजायां यथाचक्रनिर्दिष्टं मन्त्राक्षरपरिपूर्णं तथैव वियद्वति धातौ आकाशयुक्ते धातौ धर्मोदयामित्यथः । त्रिकूटगिरिगह्वरे त्रिदलपंकजमध्ये भ्रमत् कुम्भकारचक्रवद्वसत् उत्कृष्टत्वादिति ॥

तत्र स्थिरमिवातिवेगान्निर्वातनिष्कम्पदीपमिव दीप्तं ।
द्रावयेदुरुसुखचक्रं श्रवदमृतसारकृतसवनम् ॥ ६ ॥

तत्र स्थिरमिवेत्यादि ॥ तच्चक्रं ध्यायादिति पूर्वोक्तेन सम्बन्धः । स्थिरमिवातिवेगात् अत्यन्तएव—निर्वातनिष्कम्पदीपमिव दीप्तमिति सुबोधं द्रावयेत् । उरुसुखचक्रं श्रवदमृत सारकृतवसन एतद्बोधिचित कृतस्थानं तच्चक्रं गुदमेढ्रान्तरं स्थितं भावनीयं ।

CC-0. In Public Domain. Digitization by eGangotri

अत्रोपदेशः किंचिदभिधीयते । प्रथमं तावद्यत्नतः सरागं चित्तं करणीयं विद्यापंकजवज्रयोगतः पूर्वानुभूतसुखं सुगधागक्रमेण महासुखचक्रात्सभोगचक्रं सम्भोगचक्राद्धर्मचक्रं धर्मचक्रान्निर्माणचक्रं निर्माणचक्राद्वज्रमूलचक्रं वज्रमूलचक्राद्वज्रमध्यं वज्रमध्याद्वज्राग्रतश्रीबोधिचित्ते यादृशमनुत्पादलक्षणं सुखमुत्पद्यते तस्मिन्नेव सुखे स्थित्वा पुनरपि तद्बोधिचित्तं व्यावृतावधूत्यां प्रवेशयेत् । निर्मलदर्पणतलगतवाष्पविलीनं भावयेच्चिन्तयेत् ॥ अत्र श्रीवज्रगुरोः यदद्वद्धरजोराजिः सेवनीया बोधिचित्तंतु सर्वार्थवन परित्यजनीयं परित्यागाद्विरागः स्यात्तथाच सेकोद्देशे सम्बुद्धभाषितं ॥ तस्मात्सर्वं प्रयत्नेन च्युतिरागं विवर्जयेत् । येनाक्षरसुखं याति योगी संसारदन्धनात् । कामुकोपि विरागान्न कामशास्त्रं समीहते ॥ मयोक्तं किं पुनस्तत्र योगी दुःखं समीहते । शुक्लाक्षरस्वभावेन साधयेत्परमाक्षरं ॥ आधारे च्युति आपन्नं आधेयस्य विरागता ॥ आधाराधेयसंबंधो यावदक्षरतां व्रजेत् ॥ चित्तमक्षरताप्राप्तं नाधाराधेयलक्षणं ॥ ततश्च बोधिचित्तधारणं विना न बोधिर्लभ्यते तथाच श्रीकालचक्रे ॥ मध्ये प्राणप्रवेशः सरसिशिगतेर्बन्धनं सव्यवामे । चित्तं मुद्राप्रसंगे परमसुखगतं वज्रसम्बन्धनच्च ॥ अन्ते वज्रध्वनिर्वा सुकरसलिलजालाशनं सौख्यहेतोः बीजात्पायः ससौख्यो मरणभयहर श्री गुरोर्वक्रमेतत् ॥ तस्मादयसेवोयाग्रः संबोधेः ॥ ५ ॥

कायत्रयस्वभावं परमं सहजात्मकं जगद्व्यापिनं
स्फुरदमितशान्तसन्ततिं पश्येत्पश्चात्सुखं पश्चात् ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

इदानीं तस्य महासुखसमन्वितस्य चक्रसुरूपमाह ॥

कायत्रयेत्यादि । धर्मसम्भोगनिर्माणरूपं तत्र धर्मकाये सर्वप्रपञ्चातीतं सर्वज्ञत्ववेद्यः शून्यतास्वरूपः अनुत्पादज्ञानलक्षणः संभोगकायो द्वात्रिंशलक्षणाशीत्यनुव्यञ्जनसमन्वित पुण्यसम्भारनिर्यातो निरुद्धचित्तचैत्तप्रचारो बोधिसत्वैकगम्यो निर्माणकायः पूर्वप्रणिधानो वेधाविनेयकुशलनिर्जातो हि चिन्तामणीव निर्विकल्पः सर्वाभिप्रायपरिपूरकः एतत्स्वभावं परममत्युत्कृष्टत्वात् सहजात्मकं सहज आत्मस्वभावो यस्य कायत्रयस्यैकत्वात् महासुखकाय उच्यते स एव युगनद्धलक्षणः संवृत्तिपरमार्थैकरसः कथं संवृतिपरमार्थयोः एकत्वमुह्यते या वृता संवृतेर्भावसुभावत्वात् परमार्थस्य शून्यतास्वरूपत्वात् परस्परविरुद्धयोरैक्यं कथमैक्यं अतः प्रतिविधीयते तथागतः स्वापेक्षाया निरुद्धचित्तश्चैत्तः सन् शून्यतासुरूप एव विनेयचित्ताक्षया प्रतिभासनोद्भवं ततो न विरोधः कल्पवृक्षवत् । सर्वजनाभिप्रायपरिपूरकं सा धृक्तं किंतु निरुद्धो चित्तचैत्तसिकाऽयं कायस्तिष्ठतु कायस्यैव कायचित्ताधीनत्वात् । तदोपोयतः पुण्यसंभारनिर्जातः समन्तत आसंसारं तिष्ठ येवं ज्ञानसंभारबलात् । पुनश्चित्तचैत्तनिरोधः स्यात् । ततः सर्वमेव स्वस्थं अतएव सर्वजगद्व्यापकं सर्वस्यैव हि भावस्य युगनद्धात्मकत्वात् स्फुरदमितशान्तसन्ततिरविनश्वरस्वभावत्वात् । स्फुरदनन्तसुखः सन्नित्यर्थः पश्येत्संलक्षयेदित्यर्थः । पश्चात्सुखः प्रत्यग्राभिमुखः स्तत्रैव लक्षितुं शक्यत्वात् । पश्चात्सुखभावनायामभियोगं कथयति ॥ ६ ॥

प्रतिदिवसं प्रतिसन्ध्यं यथाक्षणस्वा विभावयेदेतत् ॥
यावत्सिद्धिनिमित्तं तावदिदमुच्यते व्यक्तम् ॥ ७ ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रतिदिवसमित्यादि । विभावयेदिति सम्बन्धः । एतत् पूर्वोक्तं महासुखं प्रत्यहं प्रतिसन्ध्यं वा । यदा यदा अवधूत्यां वायुः प्रविशति अथवा चतुःसन्ध्यं यथाक्षणं वा सर्वदैवेत्यर्थः । यावत्सिद्धिनिमित्तं सिद्धिः महामुद्रा तस्याः निमित्तं कारणं यावन्न भवति तावद्भावयेद्व्यक्तं । सर्वत्रैव इदं तावत्सिद्धिनिमित्तं वक्ष्यमाणं कथ्यते तदेवमाह ॥ ७ ॥

अयत्नजप्रीतिलयानुबन्धनात् ।
यदा भवेद्व्यक्तमिदं विभावितम् ॥
कशाचपेटादिह नैव वेदना ।
तदा भवेत्सिद्धिरदूरवर्त्तिनी ॥ ८ ॥

अयत्नजमिति । निरन्तराभ्यासादयत्नं विना प्रीतिरनुबन्धनात् तस्य स्थैर्य्यात् । इदंविभावितं व्यक्तं भवेत् स्फुटतरं भवेत् । तदाह कशाचपेटादिह नैव वेदना न कशा चर्मछटा चपेटा करप्रहारादिना स्वां हते यदि वेदना न भवति तदा भवेत्सिद्धिरदूरवर्तिनी समीपभूता सिद्धिरिति वेदितव्यं ॥ ८ ॥

अपरमपि निमित्तमाह ॥

प्रताडितानां पणवादिकानां पटुध्वनिर्नश्रुतगोचरश्चेत् ॥
यदाप्यते बोधिरनुत्तराग्रा स्वप्ने चिराद्ध्यानवताग्रसिद्धिः ॥ ९ ॥

प्रताडितानामि यादि । प्रकर्षेण महता प्रकारेण ताडितानां पणवादिकानां पणवा मर्दल आदिशब्देन ढक्काभेर्यादयः तेषांपटुध्वनि

CC-0. In Public Domain. Digitization by eGangotri

महाशब्दो नश्रुत्वातिगोचरो न श्रोत्रविज्ञानविषयो भवति। अपरमपि निमित्तमाह। यदाप्यते बोधिरनुत्तराग्रा स्वप्ने स्वप्ने यदा योगी सम्यक्सम्बुद्धमात्मानं पश्यति तदा अचिराध्यानवताग्रसिद्धिः प्रस्तुतैव तर्हि महासुखभावनायुक्तस्य योगिनोऽग्रे सिद्धि वर्ज्रधरत्वं स्यादेवेति ॥ ६ ॥

एतत्सिद्धिनिमितं दृष्ट्वा यत् कर्तव्यं तदाह ॥

दृष्ट्वा सिद्धिनिमित्तं पितृवनगिरिकुञ्जे वृक्षमूलादौ ॥
निवसन्नुत्पन्नक्रमयोगमजस्रं सुधीः कुर्यात् ॥ १० ॥

दृष्ट्वेत्यादि। उत्पन्नक्रमयोगं सुधीःकुर्यात् महासुखं भावयेदित्यर्थः। अजस्रं निरन्तरं पितृवनगिरिकुञ्जे वृक्षमूलादौ पितृवनं श्मशानं गिरिःपर्वतः कुञ्जो लतागृहम् वृक्षमूलं सुगमं आदिशब्दात शून्यागारादि. तत्र निवसन् तिष्ठन् एवंविधे स्थाने निवसन् तिष्ठन् योगी झटित्येव महासुखसमाधिं साक्षात् कुर्यात् चित्तविक्षेपाभावात्। समाधिसिद्धौ यद्भवति तदाह ॥१०॥

सिद्धौ वसुधादीनां भवति लयो ह्युत्तरोत्तरक्रमशः
ख्याति तदा गगनाभं प्रभास्वरं ज्ञानमात्रं सत् ॥ १ ॥

सिद्धाविल्यादि। वसुधादीनां भवति ह्युत्तरोत्तरक्रमशः पृथिव्यप्तेजोवायुविज्ञानादीनां लयोनिष्पद्यते। तत्र भूधातुर्जललीनो भवति जलं तेजसि तेजो वायौ वायुश्चित्ते चैत्तसेचैतसो

CC-0. In Public Domain. Digitization by eGangotri

अविद्यायां अविद्यापि प्रभास्वरे तथा चोक्तं। "भूधातुर्लीयते तोये तोयं तेजसि लीयते। तेजश्च सूक्ष्मधातौ च वायुश्चित्ते प्रलीयते ॥ चित्तश्चैतसिके लीयेदविद्यायान्तु चैतसः। सापि प्रभास्वरं गच्छेन्निरोधोयं भवत्रये ॥ एवं सति किं स्यात् ख्याति-प्रकाशते तदा निरोधो गगनाभं आकाशसदृशं सकलविकल्पा पगमात् प्रभास्वरं निर्मलं ज्ञानमात्रं मायोपमं अतएव सदुत्कृष्ट अत्रोच्यते। सर्वनिरोधे ज्ञानमपि कथं तिष्ठतु तस्य ज्ञेयसापेक्षत्वात्। नवक्तव्यं ज्ञानमात्रं शून्यतालक्षणमभिप्रेक्षं स्वभावशून्यं मायोपमं विकल्पमनहीनं तदत्र न निषिध्यते। तथा चोक्तं श्रीशाक्यनाथेन ॥ तांबुस्यकालिमा यद्वद्रणयोगेन नश्यति। न तस्य सत्वतानश्य निर्मलत्वेन या स्थिता ॥ तद्वच्चित्तमलः शून्यतायोगेन नश्यति। न तस्य ज्ञानता नश्ये निर्मलत्वेन या स्थिता। तद्वच्चित्तमलः शून्यतायोगेन नश्यति। नतस्यज्ञानतानश्ये निर्मल वेन याश्थिता ॥ ततश्च शून्य स्वभावं ज्ञानमात्रं विद्यत एव। तज्ज्ञानोत्पादे प्रथमतः संप्र यर्थं निमित्तान्यु पद्यन्ते ॥ ११ ॥

जानीयात्तच्चिन्हैश्चिन्हानि तु पञ्चधा विदुस्तज्ज्ञाः ॥
अत एव तानि योगी समाहितो लक्षयेन्मनसा ॥ १२ ॥

जानीयादित्यादि निश्चित्तज्ज्ञानं चिन्हैर्निमित्तैः क्रियन्ति तानि तानि चिह्नानीति चिह्नानि तु पंचप्रकाराणि विदुर्जानन्तीति तज्ज्ञास्तदर्थविचक्षणा अत एव कारणात्तानि चिह्नानि योगी समाधियुक्तो लक्षयेन्मनसा निमित्तानि क्रमेण संभवति ॥ १३ ॥ तत्र क्रममाह ॥

CC-0. In Public Domain. Digitization by eGangotri

प्रथमं मृगतृष्णाभं धूमाकारं द्वितीयकं चिन्हं ॥
खद्योतवत्तृतीयं चतुर्थं दीपोज्वलं स्पष्टं ॥ १३ ॥

प्रथममित्यादि । मृगतृष्णाभं मरीचिकासदृशं धूमाकारं द्वितीयकं चिह्नं एतत्स्पष्टमेव खद्योतवत्तृतीयं ज्योतिर्लिंगनवत्तुर्यं चतुर्थं दीपोज्वलं दीपकलिकासदृशं स्पष्टं व्यक्तम् ॥ १३ ॥
पंचमचिन्हमाह ॥

विगताभ्रगगनसदृशं पञ्चमं चिन्हं प्रकाशमविकल्पं ॥
एवं लब्धनिमित्तो मुद्रां महतीमवाप्नोति ॥ १४ ॥

विगताभ्रगगनसदृशं निर्मलाकाशवत् प्रभासुरमविकल्पं तस्मिंक्षणे चित्तचैत्तनिधानात् । एवं लब्धनिमित्तं उक्तक्रमेण प्राप्तनिमित्तो योगी मुद्रां महतीमेवाप्नोति । महामुद्रां सर्वाकार वर सहितं शून्यता साक्षात् कुर्यात् इत्यर्थः ॥ १४ ॥

उत्थातुकामः प्रणिपत्य योगिनीं
नाथं च कस्थं समुदीर्य मूः कृतिं ॥
उत्थाय कृत्यं विदधीत तत्वधी—
स्तिष्ठेत्सदा योगयुगेन योगवित् ॥ १५ ॥
इति तत्वज्ञानसंसिद्धौ भावनाविधिः ॥ २ ॥

उत्थातुकाम इत्यादि । तस्मात्समाधेरुत्थातुकामो यदा भवति

CC-0. In Public Domain. Digitization by eGangotri

तदा योगिनीं वज्रवाराहीं प्रणिपत्य नमस्कृत्य नाथं च कः शिरस्थं समुदीर्य उच्चार्य्य च मूकृतिं मूरितिमंत्रं पठित्वा उत्थाय कृत्यं विदधीत तत्वधीर्त्रिस्वभाववुद्धिस्तिष्ठेत तदा योगयुगेन युगनद्धाहंकारेण योगविन्महासुखसमाधिज्ञानं ॥ १५ ॥

इति तत्वज्ञानसंसिद्धौ मध्यमकरुचिभिक्षुध्यानचन्द्रविरचितायां महासुखप्रकाशिकायां भावनाविधिः ॥ २ ॥

अध्येषितश्च वहुशः शिष्यैः कृतमण्डलैः पदाब्जनतैः ॥
मन्त्री तिथौ दशम्यां विदधीतानुग्रहन्तेषां ॥ १ ॥

इदानीं शिष्यकरणार्थमुच्यते ॥ अध्येषितश्चेति । अध्येषितः प्रार्थितो वहुशः अनेकधा शिष्यैः कृतमण्डलैः कृतं मण्डलं यैर्मण्डलं करण पुरःसरं गुरुरध्येषणीयः पदाब्जनतैः पदपद्मं नतं येषां तैर्भिमत्रैः विमंत्रैर्भगवती मंत्रज्ञस्तिथौ दशम्यां नान्यस्यांतिथौ विदधीत कुर्यादनुग्रहं कृपां तेषां शिष्याणां ॥ १ ॥

संपूज्य मंत्ररूपां देवीं चक्रस्थितां विहितयोगः
आदाय मंत्रजप्तं परमाद्यं निष्क्रमेत्तस्मात् ॥ २ ॥

संपूज्य मंत्ररुपामित्यादि । सिन्दूरपूजाप्रस्तावे विलिखितां मंत्रस्वभावमर्चयित्वा देवीं तदेवाह । चक्रे स्थितां षडारचक्रेस्थितां विहितयोगः कृतसमापत्तिः अथवा भगवत्या महाभिन्नमूर्त्तिः आदाय गृहीत्वा मन्त्रजप्तं भगवतीमंत्रेण परिशोधयेत् । परमाद्यं निष्क्रमेत्तस्माद्भगवतीपूजास्थानात् एतदुक्तं भगवती

CC-0. In Public Domain. Digitization by eGangotri

पूज्यते तंत्रांतः पटादिकं दातव्यं ततो भगवतीं पूजयित्वा तस्माद्दे शान्मंत्रविशुद्धं द्रव्यं गृहीत्वा वहिर्गच्छेत्। शिष्यार्थमिति-भावः॥ २ ॥

अथ विहितपञ्चमण्डलमूर्द्ध स्थां तदन्तदक्षिणंशिष्यं
कुसुमस्रजं दधानं ध्यात्वेनाथं गुरुः पश्येत् ॥ ३ ॥

अथेत्यादि। शिष्यं पश्येदिति सम्बन्धः। विहितपञ्चमण्डल जानुद्वयकरद्वयशिरोभिः कृतनमस्कारमित्यर्थः। उर्द्ध तदन्त दक्षिणं कृतसर्वस्वपरित्यागं कुसुमस्रजं दधानं पुष्पमालां हस्तद्वयेन विभ्राणं ध्यातः के शिरसि नाथो गुरुर्येन तं गुरुर्वज्र गुरुरित्यर्थः॥ ३ ॥

तदनु च यथोक्तं देवीचक्रं प्रोद्यन्मरीचिकं रयवत्॥
ध्यात्वान्तवासिगात्रे वज्रभृत्तस्य संदद्यात्॥ ३ ॥

तदन्वित्यादि। तदनन्तरं यथोक्तं देवीचक्रं षडारं मन्त्राक्षर परिपूर्णं प्रोद्यन्मरीचिकं स्फुरद्रश्मिकं रयवत् भ्रमतः एवंविधं चक्रंध्यात्वा चिन्तयित्वा अन्तवासिगात्रे अन्तवासी शिष्य-स्तस्य गात्रे निर्माणचक्रे तदनन्तरं किंकर्त्तव्यं वज्रभृत्तस्य सन्द-द्यात् तदा परिपूर्णं पात्रं शिष्यस्य संदद्यात् शिष्येणच. सर्वमेवोप योक्तव्यं॥ तन्मदनमित्युपदेशः॥ ३ ॥

एवं स्यादावेशस्तत्कलिका प्रकम्पनं वाष्पः॥
पातो ज्ञानोत्पादः स्वारूपश्चापि परिपाद्याः॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमित्यादि । अनेन क्रमेणावेशःस्यात तत्र विविध आवेशः कायावेशो वागावेशश्चित्तावेशश्च तत्र कायावेशे उत्कलिका रोमांचो भवति प्रकम्पनं गात्राणां स्युः हर्षाश्रुपातो भुवि पतित्वा याति चिन्तावेशे ज्ञानोत्पादः स्वरूपप्रतिभाणं स्वयमेव स्यात वागावेशे अपूर्वप्रवचनं सारूप्यं सदृशं सर्वज्ञज्ञानप्रतिपादनम् स कथयति परिपाट्या क्रमेणेति । अथवा इत्थमपि मन्दपुण्यस्यावेशो न भवेत् तदायं विधिःकरणीयः । छागलपक्षाङ्गं पंचतथागतवीजेनाधितिष्ठेत् महातैलमहागुग्गुलुसहितं समभागं तु कारयेत् तेन वाराह्या मंत्रेण उपादेयस्तस्य घ्राणनमात्रेण समावेशो भवति निश्चितमिति ॥ ५ ॥

तदनु कथयेत्समाधिं पूजामंत्रं च वज्रयोगिन्याः ॥
श्रद्धान्वितस्य गुणिनो गुरुबुद्धाभिन्नसद्भक्तेः ॥ ६ ॥

तदन्वित्यादि । समाधिसमाधि कथयेत् । महासुखसमाधिमित्यर्थः । पूजामंत्रेण वज्रयोगिन्या । श्रद्धायुक्तस्य गुणिनः प्राज्ञस्य गुरुबुद्धाभिन्नसद्भक्ते गुरौ बुद्धे तयोरभिन्नत्वात सद्भक्तिर्यस्य यथा शास्तारं पश्यति तथा गुरुमपि ॥ ६ ॥

कथयेन्न योगमेनं सद्यः प्रत्ययकरं सुसिद्धं वा ॥
श्रद्धाविरहितमनसो भक्तिविहीनशिष्यस्य ॥ ७ ॥

कथयेन्नेत्यादि । न कथयेन्न प्रकाशयेदेवं योगं पूर्वोक्त समाधिं सद्यः प्रत्ययकरं न मित्रेण प्रतीतिजनकं सुसिद्धिदं शोभना सिद्धि

CC-0. In Public Domain. Digitization by eGangotri

महामुद्रा ददातीति श्रद्धाविरहितमनसःश्रद्धापरित्यक्तचित्तस्य भक्ति विहितस्य शिष्यस्य ॥ ७ ॥ इदानीं पुनर्दृष्ट्वानुशंसा माह ॥

विदधाति यस्तु पूजां देवीचक्रस्य मंत्रयुक्तस्य ॥
तस्यापयान्ति भयान्यष्टौ पापानि च महान्ति ॥ ८ ॥

विदधातीत्यादि । यो मंत्रपूजां कुरुते देवीचक्रस्य वज्रवाराही भगवत्या षड़ारचक्रस्य मंत्रयुक्तस्य मंत्रपरिपूर्णस्य तस्याष्टौ भयान्यपयान्ति सिंहहस्तिवह्निसर्पचौरनिगडजलेभ्यो भयान्यपयान्ति पलायन्ते पापानि च महान्ति च पंचानन्तर्यकर्माण्यपि पलायन्ते ॥ ८॥

दुर्भगता दारिद्र्यं व्याधिजरादुःखदौर्मनस्यानि
भ्रमकलिकलुषक्लेशाः पीड़ा नानाविधाश्चापि ॥ ९ ॥

दुर्भगतेत्यादि । लोके परमसौभाग्यसम्पन्नो भवति दारिद्र्यं निर्धनता व्याधिः कायपीडा जरा वार्धक्यं वाचिकी वेदनादौर्मनस्यं चैतसिकी वेदना भ्रमो भ्रान्तिः कलिर्विवादः कलुषं पापं क्लेशा रागद्वेषमोहाः ग्रहाद्युपद्रवः नानाविधा अनेकप्रकारा अपयान्तीत्यनेन सम्बन्धः ॥ ९ ॥

यो जपति चक्रमन्त्रं ध्यात्वा हृदये निरोधवाचासौ
प्राप्नोत्यष्टौ सिद्धीः पश्चाभिज्ञांस्तथाष्टगुणान् ॥ १०

CC-0. In Public Domain. Digitization by eGangotri

यो जपतीत्यादि। चक्रमंत्रं चक्रसहितमंत्रं ध्यात्वा चिन्तयित्वा हृदये निरोधवाचा मनसा असौ मंत्री अष्टौ सिद्धीःप्राप्नोति अंजन-गुटिकापादुकासिद्धौषधिमणिमंत्रयक्षस्त्रीपरपुरप्रवेशान् पञ्चा-भिज्ञाः दिव्यं श्रोत्रं दिव्यचक्षुःपरचित्तज्ञानं पूर्वनिवासानुस्मृति ऋद्धिविज्ञानं तथाष्टगुणान् अणिमा लघिमा गणिमा इषित्वं वशित्वं कर्तृत्वं भोज्यत्वं इच्छाप्रकामजा एतानष्टगु-णान् ॥ १० ॥

ध्यायति यः किरवक्त्रां प्रतिदवसं यत्नतश्चतुःसंध्यं
हरिहरहिरण्यगर्भैर्जेतुमशक्यां मृतिं जयति ॥ ११ ॥

ध्यायतीत्यादि। यो मंत्री किरवक्त्रां कोलास्यां ध्यायति प्रतिदिवसं यत्नतश्चतुःसन्ध्यं प्रातर्मध्यान्तविकाले मध्य-रात्रिषु स मृतिं मरणं जयति। हरिहरहिरण्यगर्भैर्जेतुमश क्यं ॥ ११ ।

वस्त्रान्नपानधनधान्यविशालभूमिः
प्रासाददिव्यशयनासनसाधनानि ॥
तस्योद्भवन्ति दयिता विविधाश्च विद्या,
यो भावयत्यशनिकोलमुखीं सचक्रां ॥ १२ ॥
इति तत्वज्ञानसंसिद्धौ सानुशंसा शिष्यानुग्रहविधिः ॥

वस्त्रान्नेत्यादि। वस्त्रं वसनं अन्नं खाद्यपदार्थं पानं दुग्धादि

CC-0. In Public Domain. Digitization by eGangotri

धनं स्वर्णादि धान्यं व्रीहिर्विशालभूमिर्महती पृथ्वी प्रासादं गृहं दिव्यशयनं तृतिकादि आसनं सिंहासनादि साधनानि मंचादि एतानि सकलानि तस्य मन्त्रिणो भवन्ति। वनिताश्च दिव्यांगनाः विविधाश्च विद्या नानाशिल्पकलादयः यो भावयत्यशनि कोलमुखीं वज्रकोलास्यां सचक्रां अधऊर्द्ध चक्रद्वयसहितां ॥१२॥

इतितत्वज्ञानसंसिद्धिटीकायां मध्यमकरुचिभिक्षुध्यानचन्द्र विरचितायां सानुशंसा शिष्यानुग्रहविधिः ॥ ३ ॥

अथातो मंत्ररहस्यं गुरुपरंपरायातो मंत्रोध्दारो विलिख्यते ॥

मंत्रोद्धारमतः परमधिधास्ये वज्रयोगिनीहृदयं ॥
कर्णात्कर्णमुपागतमास्यादास्यं तथाक्रमतः ॥ १ ॥

मंत्रेत्यादि । अतःपरं पूर्वोक्तादनन्तरं मंत्रोद्धारमभिधास्ये वक्ष्यामि वज्रयोगिनीहृदयं कोलमुखीहृदयं कर्णात्कर्णमुपागतं कर्णपरंपरासमायातं अत्यन्तगौरवत्वात् ॥ १ ॥

पूर्वोदितमिव चक्रं संलिख्य मरुद्गणालयोपेतां ॥
तत्र लिखेत्परिपाटित आलिकालिं तथैव कोणं ॥ २ ॥

पूर्वेत्यादि। पूर्वोदितमिव पूर्वं कथितमिव धर्मोदयाकारचक्रं संलिखेत्। मरुद्गणालयोपेतां ऊनपंचाशकोष्ठान्वितं परिपाटितो-ग्रथोक्रमं आलिकालिं तत्र चक्रे लिखेत्। अकारमारभ्य षोडश

CC-0. In Public Domain. Digitization by eGangotri

स्वरान ककारमारभ्य हकारं यावत्। अतएव त्रिकोणं प्रस्तावक्रमोऽभिधीयते। " एकं त्रीणि तथा पञ्च सप्त नव विशेषतः। एकादशत्रिभिर्युक्तं दशमं कोष्ठलक्षणं॥ उपर्युपरिभावेन लिखेत्तत्र क्रमेण तु॥ आलिकालिं क्षकारेण शून्यं कृत्वा न्यसेद्बुधः॥ ,, अक्षरोद्धारः सम्प्रति विधीयते॥ २ ॥

झाधरगं डाधरस्थं हाधरगविभूषितं समायुक्तं॥
त्रिकमादितो विलिख्यं सदक्षरं तत्वपरिदीपि॥ ३ ॥

झाधरगेत्यादि। झकारस्याधरगो यस्तं झाधरगं अकारं लिखेत् इति सर्वत्र सम्बन्धः। ड़कारस्याधरस्थो यस्तं डाधरस्थं उकारं हाधरगविभूषितं हकारस्याधरो यस्तं डाधरगं मकारं तेन विभूषितं समायुक्तं अकारउकाराभ्यां समायोगे सति ओकारस्तं मकारेण भूषितं। ॐकारमित्यर्थस्त्रितमादितो विलिखेत्॥ ··· सदक्षरतत्वपरिदीपि उत्कृष्टाक्षरतत्वप्रकाशकः॥ ३॥

भोर्द्ध्वगतं छोर्द्ध्वस्थितसमेतटोर्द्ध्वस्थितं तदनु लेख्यं॥
डाधरयुतं षाधारगं षोर्द्ध्वस्थितयुक्तशोर्द्ध्वगतं॥ ४ ॥

भोर्ध्वगेत्यादि। भकारस्योर्द्ध्वगतो यः स छोर्ध्वस्थितं छकारस्योर्द्ध्वस्थितं वकारं संयुक्त टोर्द्ध्वस्थितं रेफंतदनु लेख्यं ड़ाधरयुत षाधरगं डकारस्याधर ढकारस्तेन युक्त षाधरगं वकारं षोर्द्ध्वस्थित युक्त शोर्द्ध्वगतं पकारस्योर्द्ध्वस्थितं धकारं तेन युक्तं शकारस्योर्द्ध्वगतं दकारं॥ ४॥

CC-0. In Public Domain. Digitization by eGangotri

आधरयुतलृतलस्थं टाधरयुतपोर्द्ध संस्थितं ॥
तदनु ठाधरगान्वितफोर्द्धगं ऐवामयुतं हटान्तस्थं ॥ ५ ॥

आधरेत्यादि । आधरयुतं लृतलस्थं चकारस्याधरं आकारं तेन युतं लृकारस्य तलस्थं डकारं टाधरयुतं पोर्द्ध संस्थित तदनु ट कारस्याधरं इधारं तेन युतं पकारस्योर्द्ध स्थितं ककारं ठाधर गचितफोर्द्धगं ठकारस्याधर ईकारं तेन सहितं फकारस्योर्द्धगं नकारं ऐवामयुतं हटान्तस्थ ऐकारस्य वामं एकार तत्सहितं हटान्तस्थ हकार टकारयोर्मध्यगतं यकारं ॥ ५ ॥

चसमध्यगतं ठसव्यगसमेतं भाधरसुसंस्थितं
तदनु हथमध्यगतं तवामयुक्तं ठलमध्यग पश्चात् ॥ ६ ॥

चसमध्यगतं विलेख्यं चकारसकारयोर्मध्यगतं वकारं ठसव्यग समेतभाधरसुसंस्थितं तदनु ठकारस्य दक्षिणगतं रेफयुक्तं भाधर सुसस्थितं भकारस्याधरसुसस्थितं जकारं हथमध्येगतं हकारथकारयोर्मध्यगं वकारं । तवामयुतं ठलमध्यगं तकार स्य वामगं णकारं तेनयुतं ठकार लकारयार्मध्येगतं रेफं ॥ ६ ॥

सर्वकरान्तफमध्यगं तृतीयवर्गादिवामगसमेतं ॥
णोर्द्धयुतं लाधरगं छोर्द्धस्थं भतलगं ठसव्ययुतं ॥ ७ ॥

सर्वकरान्तफमध्यं तृतीयवर्गादि वामगसमेतं सर्वकलात्तं अःकार फकारश्च तयोर्मध्ये नकारः तृतीयवर्गस्यादिः टकार

CC-0. In Public Domain. Digitization by eGangotri

स्तस्य वामग ईकार तेन सहितं णोर्द्ध युतं लाधरं शकारस्योर्द्धे एकार स्तनसहितं लकार लाधरगतं छोर्द्ध स्थितं छकारस्योर्द्ध स्थितं वकारं भतलगं ठसव्ययुतं भकारस्य तलगं जकारठकारस्य दक्षिणं रेफं तद्युक्तं ॥ ७ ॥

तोर्द्ध गयुतं षाधरगं थोर्द्ध गसंयुक्तं णाधरगं पश्चात् ॥
फाधरगं ठाधरसंयुक्तं फोर्द्ध स्थं णोर्द्ध युक्तं लाधरगं ॥८॥

तोर्द्ध युत षाधरगं तकारस्योर्द्ध गं ऐकारं तत्सहितं ठकारस्याधरगं वकार थोर्द्ध गसंयुक्तंणाधरं पश्चात् थकारस्योर्द्ध गतं ओकार तत्संयुक्तं णाधरं रेफं फाधरगं फकारस्याधरगं चकार ठाधरसंयुक्तं फोर्द्ध स्थं ठकारस्याधरगं ईकारं तद्युक्तं फकारस्योर्द्ध स्थितं नकारं णोर्द्ध युतं लाधरगं णकारस्योर्द्ध एकारं तद्युक्तं लकारस्याधरगं यकारं ॥ ८ ॥

डाधरशून्यसमेतं त्रिवतलगं चोर्द्ध स्थितं रतलं ॥
थाधरयुतं शाधरगं आधरगसमायुक्तं चापि ॥ ९ ॥

डाधर शून्यसमेतं त्रिवतलगं ड़कास्याधरं डकारं शून्यमनुस्वारं ताभ्यां समेतं वतलगं हकारं चोर्द्ध स्थितं फकारः । रतलं रेफतलगं टकार समुद्रा येन फट्त्रयं वोधव्यं थाधरयुत शाधरगं भाधरगं समायुक्तं चापि थकारस्याधरं चकारं तत्सहितं शकारस्याधरगं सकारं आधरगसमायुक्तं चापि अकारस्याधर आकारं समायुक्तं आकारेणेत्यर्थः ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

सयमध्यगं झवामगसमेतमुक्ताक्षरकृतो रहस्यः ॥
मंत्रोयमशनीदेव्या लेख्यो जप्यो विभाव्यश्च ॥ १० ॥

सयमध्यगं झवामसमेतं सकारयकारयोर्मध्यगतं हकारं झकारस्य वामगेनाकारेण सहितमित्यर्थः। उक्ताक्षरकृतो रहस्य अक्षरकृतकाद्यक्षरात् समाकृष्य रहस्यतद्धेतुत्वात् कोसौ-रहस्यः मंत्रोयं अशनीदेव्या- वज्रवाराह्याः मंत्र इत्यर्थः अयं मंत्रः किंकर्तव्यं अत आह लेख्यो जप्यो विभाव्यश्च । लिखनीयो जपनीयो भावनीयश्च ॥ १०॥

चिन्तामणिः कल्पकुठाग्रकुम्भः
श्रीकामदुग्धेनुरपि प्रशस्ताः
ते साध्यमाना ददतीह वित्ता—
न्ययन्तु सौख्यं सधनं ददाति ॥ ११ ॥
इति तत्वज्ञानसंसिद्धौ मन्त्रोद्धारविधिः ॥

चिन्तामणीत्यादि । चिन्तामणिरत्न कल्पकुठः कल्पवृक्षः अग्रकुम्भो भद्रघटः श्रीकामधुक् श्रीकामधेनुः अपि ये प्रशस्ताः ख्याताः सन्ति ते साध्यमानाः सन्तो वित्तानि ददन्ति ॥ अस्मिल्लोके। अयं पुनर्मन्त्रराजः सौख्यं लोकोत्तरं महासुखं ददाति। सधनं धनसहितमित्यर्थः अन्यः पुनःसाधिताः सन्तो धनमेव किंचिददति ननिरूत्तरसुखं अयं तु सर्वप्रदः ततश्चायमेव सर्वप्रकारेण सर्वदा सर्वाभिवांछितसिद्ध्यर्थं लोके लोकोत्तरसिद्धिनिमित्तकं

CC-0. In Public Domain. Digitization by eGangotri

बोधिसत्वैः सेव्यः ॥ ११ ॥

इति तत्वज्ञानसंसिद्धौ टीकायां मध्यमकरुचिभिक्षु श्रीध्यान-चन्द्रविरचितायां मंत्रोद्धारणविधिः ॥ ॥

यस्मिन्नयं पात्रगते ऽलिख्य, पूजानिमित्तं विधिना विधिज्ञः॥
बालस्य रक्षा विधिवद्विधेया, बद्धेन दोःकण्ठशिखासुबाहौ ॥

यस्मिन्नित्यादि । यस्मिन्दर्पणादिभाजनगतेऽयं मंत्रराजो विलिख्य पूजानिमित्तं विधिना यथाविधिज्ञस्सन्मंत्रिभिः बालस्य रक्षा विधिवद्विधेया शिशोः रक्षा कार्या भगवतीपूजापुरः सरं बद्धेन तेन मंत्रसहितं सिन्दूरेण कुत्र दोःकण्ठ शिखासुबाहौ कण्ठे शिखायां ॥ १ ॥

दृष्ट्वाऽपयान्ति भुजगाः शिशुकं सरक्षं,
भूता ग्रहा निशिचराः सपिशाचसंघाः॥
अन्ये च बालकभयार्त्तिकराः सुभीमाः
सिंहं यथा वनचरा बलिनम्भयार्त्ताः॥ २ ॥

दृष्ट्वेत्यादि अपयान्ति पलायन्ते भुजगाः सर्प्पाः । शिशुकं-दृष्ट्वा सरक्षं रक्षासहितं भूतग्रहा निशिचराः सपिशाचसंघा अपि पलायन्ते अन्येपि बालकभयार्त्तिकराः डाकिन्यादयः सुभीमाः परमभयानकाः । अत्र दृष्टान्तमाह ॥ सिंहं दृष्ट्वा यथा वनचरा मृगादयः अपयान्ति सिंहं किंविशिष्टं बलिनं

CC-0. In Public Domain. Digitization by eGangotri

वलवन्तं वनचराः किंविशिष्टा भयार्त्ता भयपीडिताः सन्तः पलायन्ते ॥ २ ॥

संप्राप्य सदुपदेशं दृष्ट्वा संप्रत्ययं च योगस्य
सिद्धिरियं समभिलेखि स्फुरदमलज्ञानसंवसतिः ॥

संप्राप्येति । सिद्धिरियंसमभिलेखीति सम्बन्धः । सम्प्राप्य सदुपदेशं यथावदुपदेशं लब्ध्वा दृष्ट्वा संप्रत्ययंच योगस्य अस्य भगवतीयोगस्य प्रतीतिम्वीक्ष्य स्फुरदमलज्ञानं सम्वसतिः स्फुरत्प्रकाशरूपत्वात् अमलं ज्ञानं सर्वक्लेशोपरमात्रस्य संवसतिः स्थानं ॥ ३ ॥

तस्मात्तत्संप्राप्त्यै संसेव्यं सगुरोः पदाम्बुरुहं ॥
सान्ना प्रदानविधिना कायक्लेशैः प्रणामैश्च ॥ ४ ॥

तस्मादित्यादि । अतएव तत्संप्राप्त्यै तदुपदेशलाभाय संसेव्यं सम्यगाराधनीयं सगुरोर्लब्धनिमित्तस्य पादाम्बुरुहं चरणपद्मं सान्ना सौमनस्येन अथवा प्रदानविधिना प्रकृष्टवस्त्रदानेन कायक्लेशैर्वा प्रणामैर्वा सर्वप्रकारेण गुरोः आराधनं सर्वं

तत्वज्ञानाग्रसिद्धिर्वहुहितजननी या जनन्येव लोके
सत्वानां यन्मयोसीत्कुशलमकलुषं पूर्णचद्रांशुशुभ्रं ॥

CC-0. In Public Domain. Digitization by eGangotri

भूयासुस्तेन लोकाः कलिमलविकला शुद्धसम्बोधिभाजो
लब्ध्वा मुद्रामुदारां भवभयशमनीं सर्वसत्वार्थकर्त्रीं ॥५॥
समाप्तोयं तत्वज्ञानसंसिद्धिर्नाम स्वाधिष्ठानश्चेति
शुभम् सर्वदा

तत्वज्ञानेत्यादि । तत्वं अनुत्पादं तथा च जिनजनन्यां योऽनुत्पादः सर्वधर्माणां सा प्रज्ञापारमिता तस्य तत्वज्ञानाग्रसिद्धिं श्रेष्ठसिध्दि श्चक्रहितजननी चक्रपुण्यजननी यो लोके त्रैधातुके जनन्येव सर्वसत्वानां समीहितार्थप्रसवनाद्वङ्ग पुण्यमासीत् कुशलअकुशलं क्लेशरहितं पूर्णचन्द्रांशुवत शुभ्रं भूयासुः तेन पुण्येन लोकाः कलिमलविकलाः कलिविवादो मलंक्लेशाला-स्ताभ्यां विकलारहिताः शुध्दसम्बोधिभाजः सम्यक्सम्बोधि जाभिलध्वा उदारां महामुद्रां प्राप्य भवभयशमनीं भवः संसारः समो निर्वाणं तयोः शमनीं भवनिर्वाणग्रहनिवारणीं सर्वासत्वार्थकर्त्रीं सर्वसत्वानां सम्बोधिकारिणीत्यर्थः ॥ ५ ॥

इतितत्वज्ञानसंसिध्दिटीकायां मध्यमकरुचिभिक्षुश्री-ज्ञानचन्द्रविरचितायां सामर्थ्यपुण्यपरिणामनाविधिः समाप्तः ॥ ॥



CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

A853